**त्रिस्रोतस्** स्त्री त्रिषु लोकेषु स्रोतो यस्याः। गङ्गायाम् "त्रिस्रोतसः कान्तिमतीत्य तस्थौ" कुमा०। "कृताभिषेकै-र्दिव्यायां त्रिस्रोतसि च सप्तभिः" रघुः।

**त्रिस्रोतसी** स्त्री त्रीणि स्रोतांसि सन्त्यस्याम् अच् गौरा० ङीष्। स्रोतस्त्रययुक्ते नदीभेदे "तथा समुद्राश्चत्वारः। नदी भागीरथी च सा" इत्युपक्रमे "लवन्ती गोमती चैव सन्ध्या त्रिस्रोतसी तथा" भा० स० ६अ०। वरुणसभास्थतीर्थभूतनद्यादिकथने।

**त्रिस्पृशा** स्त्री त्रीणि चान्द्रदिनानि एकस्मिन् सावने दिने स्पृशति स्पृश-क। एकादशीभेदे "यदा पूर्वदिने दशमी परदिने चैकादशी स्वल्पा ततो द्वादशी रात्रिशेषे त्रयोदशी सा चैकादशी त्रिस्पृशा" रघु० "एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। तत्र क्रतुशतं पुण्यं त्रयोदश्यान्तु पारयेत्" एका० त० धृत वचनम्। "एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। त्रिस्पृशा नाम सा ज्ञेया ब्रह्महत्यां व्यपोहति" संवर्त्त-वचनम्। अष्टसु महाद्वादशीषु वासरत्रयस्पर्शिन्यां द्वादश्याञ्च द्वादशीशब्दे दृश्यम्।

**त्रिस्नान** न० त्रिषु कालेषु स्नानमत्र। त्रिकालस्नानाङ्गे व्रतभेदे। तच्च वानप्रस्थाङ्गं प्रायश्चित्ताङ्गञ्च। तत्राद्यं कामन्दकीनीतिशास्त्रे उक्तं यथा "वनवासः पयोमूलनीवारफलवृत्तिता। प्रतिग्रहनिवृत्तिश्च त्रिस्नानं व्रतचारिता। देवातिथीनां पूजा च धर्मोऽयं वन-वासिनः"द्वितीयन्तु त्रिषवणशब्दे दर्शितम्। [क्षेत्रे अमरः

**त्रिहल्य** न० त्रिः हलेन कृष्टं क्षेत्रम्। त्रिवारं हलेन कृष्टे

**त्रिहायण** त्रि० त्रयो हायना वयोऽस्य णत्वम्। त्रिवर्षे गवादौ "अथ संस्मारणं कृत्वा लक्षयित्वा त्रिहायणान्" भा० व० २३१ अ०। स्त्रियान्तु ङीप्। "त्रिहायणी त्रिवर्षा गौः" अमरः। "वत्सतर्यश्च त्रिहायण्योऽप्रीताः पञ्चवर्णा राजीवपृश्नयो नवनीतपृश्नयोऽरुणाः पिशङ्ग्यः सारङ्ग्यः" कात्या० श्रौ० २२।८।१२ । २द्रौपद्यां ब्रह्मवै० "कृते युगे वेदवती त्रेतायां जनकात्मजा। द्वापरे द्रौपदी छाया तेन कृष्णा त्रिहायणी" जन्मखण्डम्।

**त्रीषु** त्रि० त्रय इषवः परिमाणमस्य कन् तस्य लुक्। १इषुत्रय-मिते स्थाने। त्रयः इषवो यत्र कप्। २बाणत्रययुक्ते धनुषि न०। "त्रीषुकं धनुर्दक्षिणा" कात्या० श्रौ० २५।४। ४७।अस्यां त्रिष्टुविष्कायामिष्टौ त्रिभिरिषुभिरुपेतं धनुर्द-क्षिणेत्यर्थः" सं० व्याख्या।

**त्रैष्टुक** पु० त्रिस्तः कृगादिरूपा इष्टका यस्य। अग्नि-भेदे "स एष त्रैष्टुको अग्निः। कृगेका यजुरेका सामैका तद्यां कां चानचोंपदधाति ऋच एव तस्या आयतन-मथ यां यजुषा पुरुष एव तस्या आयतनमथ यां साम्ना पुष्करपर्णमेव तस्या आयतनमेवं त्रैष्टुकम्" शत० ब्रा० १०।५।२।२१।

**त्रुट** छेदने वा दिवा० पक्षे तुदा०कु०पर०अक० सेट्। त्रुट्यति त्रुटति अत्रु(त्रो)टीत्। तुत्रोट। छेदश्चात्र अवयवद्विधा-भाव मात्रम् "यावन्मे दन्ता न त्रुट्यन्ति"हितो०"त्रुटित पयोधरतटे हारं पुनर्योजय" सा० द०। "त्रुटित इव मुक्तामणिसरः" उत्तर०।

वि+विरुजीकरणे सक०। "कण्टकैरेना विरुजेयुः" कात्या० श्रौ० २३।३।२२। "विरुजेयुः वित्रुट्येयुः" सं० व्याख्या।

**त्रुट** छेदने चुरा० आ०सक० सेट्। त्रोटयते अतुत्रुटत।

**त्रुटि(टी)** स्त्री कुटा० त्रुट—इन् वा ङीप्। १सूक्ष्मैलायां २अल्पे ३संशये ४कालभेदे च अमरः स च "योऽक्ष्णोर्निमेषस्य खराम३०भागः स तत्परस्त-च्छतभाग उक्ता। त्रुटिर्निमेषैर्धृति१८भिश्च काष्ठा तत्त्रिं-शता सद्गणकैः कलोक्ता" सि० शि० उक्तेः तत्परस्य शतभागकालरूपः। "क्षणद्वयात्मकः कालस्त्रुटिरिति' 'भरतः तन्मूल्यं मृग्यम्। तदपेक्षया क्षणस्य भाग० अधिककालतोक्तेः तस्यामूर्त्तत्वात् क्षणस्य मूर्तत्वाच्च तथा हि "प्राणादिः कथितो मूर्त्तस्त्रुट्याद्योऽमूर्त्तसंज्ञकः" सू०सि०"त्रुटिराद्या यस्य तादृशः कालः एकप्राणा-न्तर्गतत्रुटितत्परादिकोऽमूर्त्तसंज्ञकः व्यवहारायोग्यत्वे-नाप्यमूर्त्तत्वम्। भाग० ३।११।५, ६। अन्यथा मानमुक्तं यथा "अणू द्वौ परमाणुः स्यात् त्रसरेणुस्त्रयः स्मृतः। ज्वालार्करश्म्यवगतः खमेवानुपतन्नगात्। त्रसरेणुत्रयं भुङ्क्ते यः कालः सः त्रुटिः स्मृता। शतभागस्तु वेधः स्यात्तैस्त्रिभिस्तु लवः स्मृतः। निमेषस्त्रिलवो ज्ञेय आम्नातस्ते त्रयः क्षणः"। "मरुतः सह पर्जन्याः कलात्रुटिलवक्षणाः"हरिवं०१६८अ०।"शुक्लस्त्वं बहुलस्त्वञ्च कला काष्ठा त्रुटिस्तथा" भा० आ० २५ अ०। "प्राण-त्रुटिलवव्यवधानकालस्य ज्ञेतस्य च वेत्ता" ह०सं०२अ०। २कुमारानुचरमातृभेदे "कौशयन्ती त्रुटिर्नाम क्रोशना तु तडित्प्रभा" भा० ग०४७० मातृगणोक्तौ। भावे इन्। ३अवयवादिहीनतायाम्।

**त्रुटिवीज** पु०त्रुटिरल्पं वीजमस्य। कचौ मूलभेदे शब्दमा०।